International Journal of Sanskrit Research 2019; 5(1): 54-56

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(1): 54-56
© 2019 IJSR
www.anantaajournal.com
Received: 19-11-2018
Accepted: 22-12-2018

डॉ0 अश्विनी कुमार
बेहटा, बेनीपट्टी,
मण्डलम्–मधुबनी, बिहार, भारत

Correspondence
डॉ0 अश्विनी कुमार
बेहटा, बेनीपट्टी,
मण्डलम्–मधुबनी, बिहार, भारत

# वाल्मीकिरामायणस्य उत्तरवर्तीकाव्येषु प्रभावः

## डॉ0 अश्विनी कुमार

**प्रस्तावना**

उत्तरवर्तीकवयः वाल्मीकेः शैलीगतं वैशिष्ट्यमनुहरन्ति। तानि च वैशिष्ट्यनि अधोलिखितेन विधिना कल्पयितुं शक्यानि। नायकस्य सैन्याद्युपरकरणहिता प्रस्तुतिः। यथा– रामो वनं गच्छति। भ्रतुः परिचर्यार्थः लक्ष्मणोऽनुगच्छति। पतिभक्तिपरायण भगवती सीता च सहचरति। किन्तु तत्र नानुगच्छति अयोध्याधिपतेः वाहिनी। रामो युध्यति। न तत्र परम्परानुगता सेना यद्यपि वानराः भवन्ति सहकारिणः किन्तु रावणस्य यादृशी सेना तादृशी स्थिती रामस्य नास्ति। क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे इत्येनामुक्तिं चरितार्थयति जीवनेभगवान् रामः। लक्ष्मणः हनूमान् अड्.गदः अन्ये च महाबलिनः स्वपराक्रमेष वैरिणो विजयन्ते। उपकरणानि पराहतानि भवन्ति। सत्वं जयति सत्यं समुत्सहते आर्तत्राणभावना शक्तिं सञ्चिनोति।[1] दृष्कृतां संहार भावना पुष्णाति। सात्त्विकशराणां मनोमृगेन्द्रम्।

इयं प्रवृत्तिः नायकानां संसृष्टौ उतरवार्तिकविषु भूयसा दृश्यते। कालिदासस्य रघुवंशे दिलीपः गां चारयितुं गच्छति। सः सर्वतोभावेन नन्दिनीं परिचरति। राजा सन्नपि राजचिह्नं न दधाति। तस्य तेजो विशेषेण तदीया राजलक्ष्मीरनुमीयते। सोऽन्तर्मदाावस्थ द्विपेन्द्र इव विभाति। यथा–

संन्यस्तचिह्नमपि राजलक्ष्मीं तेजो विशेषानुमितां दवानः।
आसीदनाविष्कृतदानराजिर–न्तर्मदावस्थ इव द्विपेन्द्रः।।[2]

तस्यपार्श्वे सेना नास्ति। किन्तु अनुचराश्चापि न सन्ति। आलोकशब्दस्य कार्य वयसां ध्वनिभिः सम्पाद्यते। यथा–

विसृष्टपार्श्वानुचरस्य तस्य पाार्श्वद्रुमाः पाशभृता समस्य।
उदीरयामासुरिवोन्मदानामालोक शब्दं वयसां विरावैः।।[3]

ये पार्श्वगता अनुचरा आसन् तेऽपि विसृष्टाः। वाल्मीकेः रामो यथा एकाकी तथैव दिलीपोऽपि नन्दिनीं सेवमान एकाकी अरण्यं परिभ्रमति। किरातार्जुनीये अर्जुनः शिशुपालबधे श्रीकृष्णः उत्तरामचिरितादिषु रामादयः निरूपकरणं संदर्शिताः वाल्मीकिना नायकप्रस्तुतेः योऽयं पन्था दर्शितः तस्यानुसरणं उत्तरवर्त्तिभिः कविभिः भूयिष्ठतया कृतम्। अश्वघोषस्य बुद्धचरिते बुद्धसय प्रस्तुतिरपि तादृशी। सौन्दरनन्देऽपि सैव स्थितिः। अत्र भारतीयासंस्कृतिरपि द्योतिता यद् राजानः स्वात्मानं निरूपकरणं प्रजाभूतये व्यापारयन्ति। नापेक्षन्ते ते किमप्युपकरणान्तरम्। यथा भगवान् नृसिंहः हिरण्यककशिपुं व्यवहारयत् प्रहरणनिरपेक्षः यथोक्तमाचार्येण आनन्दवर्धनेन–

स्वेच्छाकेशरिणं स्वच्छ स्वच्छायायासितेन्दवः।
त्रायन्तां वो मधुरिपोः, प्रपन्नर्तिच्छिदो नखाः।।

अत्रापि सैवच्छाया।

यथा उपर्युक्त विवेचने वाल्मीकिरामायणस्य प्रभावः परिलक्ष्यते तथैव नाटकेऽस्मिन्। नाटकस्य तत्त्वमस्ति नेता पात्राणि वा। पात्राणां प्रमुखो नेता भवति, अन्यानि पात्राणि नायकस्य सहकारीणि भवन्ति। एवमेव नायकसय प्रतिपक्षी प्रतिनायको भवति, तस्यापि सहयोगिनो भवन्ति। प्रकृतनाटकस्य नायकोऽस्त्यपवर्गः यस्योदयमाकाङ्क्षितमस्ति। क्षेत्रनगरे महामोहः प्रतिष्ठितोऽस्ति तमुन्नील्यापवर्गमतिषेक्तुं श्रुतिः सह परिवार विद्याभिः यतते। महामोरस्य सहायपक्षे सर्वाः नास्तिकविद्याः समुन्तिष्ठन्ति। तत्सम्प्रदायाचार्याः तत्प्रतिनिधि भूताः प्रस्तुताः सन्ति, एवमेव श्रुतिसहयोगिन्यः आन्वीक्षिक्या दयः विद्याः, श्रद्धा, भक्तिः क्षम–दयादयश्च समवेताः भवन्ति। शत्रु पक्षे काम –क्रोध–लोभ–दम्भदयरश्य क्रियाशीलाः भवन्ति। पुरूषोत्तमानुग्रहात् पुरूषः कृतकृत्यो भवति, मोहश्य पराजितो भूत्वाऽन्तर्हित। भवति। पक्षता, परामर्शः, अनुमितिः, प्रमितिः, श्रद्धाः, सिद्धिरित्यादिप्रकृतपात्राणां प्रयत्नेन श्रुतेः योजना सफली भवति। तनाव्र श्रुतिरेव मुख्यं पात्रं परिलक्ष्यते किन्तु सा कथा नायिका नास्ति, अपि तदधीना नायकस्योन्नतिरूदयो वाऽस्ति। तेनात्र नायकः परायत्तसिद्धिः लक्ष्यते। नायकस्य कार्यसिद्धि त्रिधा कथ्यते– स्वायत्तसिद्धि, परायत्तसिद्धिः, उभयायत्तसिद्धिश्च। इह नायकः परायत्तसिद्धिरेवः। नायकोऽयमैलौकिकः दिव्य जन्मा कुलीनश्चास्तीति नात्र संशयः। नाटके कश्चितप्रख्यात्वंशः, धीरोदात्तः, युवा च कर्त्तव्यः इति सामान्योनियमः मत्यो वा राजर्षिः, रूढ़वंशः इति। इह नाटके सर्वाणमेव पात्राणि लोकोत्तराणि सन्ति, ये च उदयन – चुमारिल – प्रभाकरादयः श्रूयन्ते लौकिकभास्तेऽपि शास्त्रप्रतीकभूताअलौकिक स्वमन्तं शक्यन्ते। तेन नाटकीयं वस्तु, नेता च दिव्यमेवेति निर्णेतुमुचितम् नाटकस्य सर्वप्रमुखं तत्त्वमस्ति रसः। रस योजना नाट्ये काव्ये च विशिष्टं स्थानं रक्षति। रसलोलुपाः सहृदयाऽसायाजिकाः काव्ये नाट्ये च प्रवर्तन्ते। शास्त्रीयं वस्तु शास्त्रप्रतीक भूतानि पात्राणि च न सामान्येन रसाश्रयभूतानिं भवन्ति। रसोपयोगिनि वस्तुनि रसयोजना सरला भवति, किन्तु रसानुपयोगिनी वस्तुनि रसयोजना सुदुष्टकरेति नाविदितं विदुलाम्। तथापि प्रकृते नाटके सुष्ठ ज्ञातं भवति। निश्चयनतार कार्य सिकतासु तलान्वेषणवत् कठिनमासीत् किन्तु नाटककारेण स्वीयालौकिकप्रतिभावसेन तत्रापि साफल्यमाप्तम्। रसानां संख्या नवेति सामान्येन स्वीकृतमस्ति, तेषामेक्त्र योजना प्रधानगुण भावेनैव सम्भवति, तेन हि कश्चित् प्रधानो रसः क्रियते, तेषाश्च गौणास्तस्य प्रधानस्य सत्येगिरूपेण, प्रस्तुतः भवन्ति। तेषामयं भावोऽङ्.गङ्.गरूपेण गृह्यते। यथा अङ्.गानि शरीरस्य सहयोगकरणि, भवन्ति, तथैवाङ्.गीरसस्य अङ्.गरसास्तस्योपकारकाणि भवानी। तेन हि यं रसाः यस्य विरोधिनस्ते तत्र परित्याज्याः अन्यथायोज्या वा कथिताः सन्ति। तन विराधिपरिहारेणात्र रसा अङ्.गाङि्.गभावन याज्या इति रसयोजनया नियमः कृतोऽस्ति रसकोविदैः– नवस्वपि रसेप्रत्रय एव रसाः प्रधानरूपेण कर्त्तव्याः भवन्ति–श्रृङ्.गार, वीरः, शान्तश्चेति। प्रायेण लौकिकथासु सचेत वृत्तिषु श्रृङ्.गारङ्.गवीरो वाऽङ्.गीरसः क्रियते। प्रबोधचन्द्रोदयनाटकेऽपि शान्तरस एवाङ्.गीकृतो कृतोऽस्ति।[4] इहामृतोदयनाटकेऽपि शान्तरसः एवाङ्.गीति प्रतिपत्तव्योऽस्ति। शास्त्ररसविषयो विचारः पूर्वनाटकस्य नगरत्वविचार प्रसङ्.गे कृतोऽस्ति।[5] यद्यपिशान्त रसस्याङि्.गत्वविषये रसत्वविषये वारसाचार्येषु मतभेदः प्राप्यते, किन्तु नाटककारैः शान्तस्याङि्.गत्व स्थापनायैव निदर्शनानि प्रवर्तितानि। अमृतोदयनाटकमपि तदपवाद्भूतं नास्ति। प्रकृतनाटके प्रारम्भतः पर्यवसानं यावत् शान्तरसः स्थायी विद्यते। शान्तरसे समेषां रसानां समानवेशः सम्भवति यतोह्युक्त मस्ति– 'शान्तात् प्रवर्तते भावः शान्त एवोपलीयते' इत्यादि।

पुरुष–पुरूषोत्तमयोः संवादो भवति। प्रसङ्.गावलो कनेन ज्ञायते यदत्र पुरूषः पुरूषोत्तमानुग्रहात् मुक्तिपदसन्निहितोऽस्ति। पुरूषः प्रयत्नपूर्वकमपधातान् निरस्यति पुरूषोत्तमे निष्ठां लभते येन तस्य मुक्तिलाभः प्रायेण निश्चितो भवति। तेनात्र प्रकरीरूपार्थप्रकृतिः नियताप्ति सदाख्यया कार्यावस्य पर समन्विता परमपुरूषार्थ रूपापवर्गपदविमर्शनात् विमर्शनामातुरीयः सन्धि रिति। पञ्चमेऽङ्.के पुरूषोत्तमः पुरूषाय स्वरूपं दर्शयित्वाऽन्तर्हितो भवति। पुरूषः पुनः पुनरनुसन्धाय पुरूषं द्रष्टुमीहरो। पुरूषस्यान्तरं विशुद्धं विद्यते। अयमेवावसरः क्षेत्रज्ञनगरेऽपवर्ग– मभिषेक्तुम्ऽदाह श्रुतिः– वत्से! एतदवसानानि पुरूषस्य व्यवसितानि असावेव चास्य दुःखानामत्यन्तविमोक्षोयदपवर्गप्रतिष्ठा नामोप्रतिष्ठिते च प्रशान्ति सामैकधने राजन्यवर्गे– पुरूषस्यास्य नगरे न भेदो न च विग्रहः। भेदविग्रहभूलस्तु दुःखदणः पतेत्कुतः। तादमिषिक्ष्यतामपवर्गः क्षेत्रज्ञनगराधिपत्यै इत्यादि। अपवर्गस्वरूप विषये विविधागमानां मतानि भिन्नानि सन्ति, तानि निखिलानि निरस्य न्यायसम्मतमेवायवर्ग मभिषेक्तुमादिशति श्रुतिः। तथा चास्ति प्रसङ्.ग श्रुतिः वत्स अपवगे, इह सिंहासने तावदुपविशत्वाममिषेश्यामः क्षेत्रनगराधिराज्ये, इत्यादि।

पुनश्चापवर्गमभिषिच्य सर्वाविद्या अपवर्गमभिषिक्तं निरीक्ष्य–'बुद्धिः शरीरं विषयेन्द्रियाणि सुखं च दुःखैकनिकेतन! विवेकिने केवलमात्मविद्यावियोति स्वदतेऽपवर्गः। श्रुतिरप्याह वत्स, अपवर्ग, अभिषिक्तः क्षणदृष्टोऽसि। द्रक्ष्यमाणः प्रीणयस्यस्मान्' इत्यादि। एतेनास्य नाटकीयस्य कार्यनामार्थ प्रकृतेः फलागमाख्यया कार्यावस्थया समन्विततयात्र प्रतिज्ञास्यार्थत्य निर्पणरूपेण निर्वहणसन्धिखलोक्यते। एतेनात्र

नाटके पञ्चसन्धिविधानं सुघटित मवलोक्यते। नाटकारम्भे बृहती प्रस्तावना प्राप्यते। सामान्येन नाटकीय प्रस्तावनायां कविवंशवर्णनं कवेराश्रयदातृपरिचयादिकञ्चो पस्थाप्यते किन्त्वत्र नाटके नाटककारेण स्वाश्रयदातृपरिचयादिकं नैवोपन्यस्तमुपलभ्यते, तेन हिनाटककारोऽयं नाटकरचनासमये न कस्यचिद्राज्ञः समासदास्तिदिति प्रतीयते। नाटकमिदं तेन स्वान्तः सुखाय प्रणीतमिति वक्तुं शक्यते प्रबोधचन्द्रोदयन्तु कृष्णमिश्रेण स्वाश्रयदातुः प्रेणया प्रणीतातमिति तत्रत्य प्रस्तावनाप्रसड्.गे तेन कथितम्।

प्रकृतनाटके मध्ये विषकुम्भकमुखेन कन्याहरणसड्.गमादिप्रसड्.गादि सूचनं विहितं, यतो हि नाटकादौ कन्याहरण– सड्.ग्रामादिवृत्तानां प्रदर्शनं प्रतिषिद्ध विद्यते नाटकविद्मः। नाटकान्ते कविवंशप्रशस्ति रूपस्थापिताऽस्ति। अयमभिनवः पन्थाः नाटककारस्येति वक्तुं शक्यते। काव्ये कविवंश वर्णनादिविषयः प्रारम्भे प्रस्तूयते क्वचित् किन्तु नाटके प्रस्तावनायां नाटककारस्य विषये किञ्चिदुक्तं भवति, नाटकान्ते काव्य प्रशंसा कविवंशप्रशंसा वा अदृष्टपूर्वेव। अस्तु, नाटकीय वस्तु योजनादृष्ट्या नाटकमिदमपूर्व पूर्णलक्षणान्वितञ्चेति। वस्तु तत्त्वस्य विस्तारोऽड्.केषु प्रविभक्तो भवति। नाटके न्यूनातिन्यूनं पञ्चाड्.गाभवन्ति, अधिकाधिक दशेति नियमोऽस्ति। नाटकीयाः सन्धयः स्पष्टाः सर्वाड्.गपूर्वाश्चमवेयुरित्याशयेनैव नाटके पञ्चाड्.कस्य विधानमपेक्षितमिति प्रतीयते। इह नाटकेऽपि पञ्च अड्.का सन्ति, कदाचित् अड्.कस्य नामकरणमपि क्रियते काव्येऽपि नाटकीयस्याड्.कस्य नामकरणं विहितं प्राप्यते, किन्तु प्रस्तावनायाः नामकरणं नैवान्यत्र इह त प्रस्तावनापि नामयुताऽस्ति। आत्मदर्शनस्य विविधानि सत्पौनि निरूपितानि सन्ति– श्रवण– मनन– निदिध्यासन– दर्शनादीनि। यथा–'आत्मा वाऽरेमैत्रेयी श्रोतव्यो मन्तव्योनिदिध्यासितव्यो द्रष्टव्यः –इत्याधुपनिषदि। अपि चान्यत्र– श्रोतव्यः श्रुति वाक्येभ्यं मन्तव्यश्चोपपत्तिभिः। मत्त्वा च सततं ध्येय एते दर्शनोहतवः। एते श्रवणादयो मोक्षोपायभूलाः निरूपिता भवन्ति किन्तु मोक्षोपाय पूर्वमेव मोक्षाधिकारार्थ साधनानि समपेक्षितानि भवन्ति, साधनैः सम्पन्नो हि कश्चित् मोक्षार्थयतमानः साफल्यमाप्नोति। तानि च साधनानि चत्वारि मन्यन्ते न्यायगमे–नित्यानित्यवस्तुविवकः, इहामुत्रफलनविरामः, शम–दमादिसाधन सम्पत्, मुमुक्षुत्वञ्चेति साधन चतुष्टं विधते। एतत्साधन चतुष्टयनिरूपणात्मिका प्रस्तावना नाटकारम्भे रचिता प्राप्यते तस्या नाम च कृतमस्ति इति साधनचतुष्टः सम्पत्तिर्नाम प्रस्तावनेत्यादिना। एतेनास्याः प्रस्तावनायाः वस्तु संसूचितं भवति। एवमेव प्रत्यड्.कस्य नाम त}तवस्तुसंसूचनात्मकं कृतं प्राप्यते– 'इति श्रवणसम्पत्तिर्नाम प्रथमोड्.कः इत्यादि रूपेण।

निष्कर्षः

नाटकस्य फलमस्ति अपवर्गलाभः तस्य परिणतिः पञ्चमोऽड्.के जायते तेन पञ्चमाड्.कस्य नाम 'अपवर्गप्रतिष्ठाः' कृतमस्ति। एतैः नामानुरूपैरड्.कैः नाटकीयस्य वस्तुतत्त्वस्य सूचना प्राप्यते इतिविशेषः, वस्तुतत्त्वस्य प्रसिद्धिरपि पोष्यत। एवञ्च वाल्मीकिरामायणस्य प्रभावः विविधशैलीदृष्ट्या काव्ये महाकाव्ये नाटके च विद्यते एव।

संदर्भः

1. काव्यशास्त्रेतिहासः, पृ0 सं0– 43–45।
2. रघुवंशमहाकाव्यम्, द्वितीयसर्गे।
3. तत्रैव।
4. प्रबोधचन्द्रोदयनाटके, पृ0 सं0– 22–23।
5. अमृतोदयनाटके, पृ0 सं0– 27।